*AH-I/SNS-102C-2/19*

# B.A. 1st Semester (Honours) Examination, 2019-20

# SANSKRIT

**Course ID : 10912** **Course Code : AHSNS-102C-2**

Course Title: Classical Sanskrit Literature (Prose)

**Time: 2 Hours** **Full Marks: 40**

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

**1.** अधोलिखितेषु प्रश्नेषु **Group-A** इत्यत: *द्वयो:* प्रश्नयो:, **Group-B** इत्यत: *द्वयो:* प्रश्नयो:, **Group-C** इत्यतश्च - *एकस्य* प्रश्नस्योत्तरं देयम्। तेषु यथेच्छं *द्वयो:* प्रश्नयोरुत्तरमवश्यमेव संस्कृतभाषया देवनागरलिप्या च लेख्यम्। 5×2=10

**Group-A**

**(दशकुमारचरिते)** 2×2=4

(a) 'अवसितश्च ममाद्य शाप:' — कस्या: शापोऽवसित:? तस्या: शापस्य कियती व्याप्तिरासीत्?

(b) दर्पसार: कुत्र तप: कृतवान्? दर्पसारेण कस्य समीपे किं प्रतिज्ञातम्?

(c) 'दयित त्वत्प्रसादादद्य मे चरितार्था श्रोत्रवृत्ति:' — कया कस्मै इदमुक्तम्?

**Group-B**

**(कादम्बर्या: कथामुखे)** 2×2=4

(a) 'गुह इवाप्रतिहतशक्ति:'– को गुह:? कस्य शक्तिरप्रतिहता?

(b) 'हर इव *जितमन्मथ:*' - रेखाङ्कितस्य पदस्य व्यासवाक्येन सह समासनाम विलिख्यताम्।

(c) 'अमरगुरुमपि प्रज्ञयोपहसद्भिरनेककुलक्रमागतै: ......।' - क: अमरगुरु:? के अमरगुरुं प्रज्ञया उपहसन्ति?

**Group-C**

**(कादम्बर्या: शुकनासोपदेशे)** 2×1=2

(a) चन्द्रापीडस्य पिता क आसीत्? चन्द्रापीडं क उपदिष्टवान्?

(b) अनवरतमखाग्निधूमेनाश्रुपात: - इत्यस्य सन्धिविच्छेद: क्रियताम्।

**2.** अधस्तनेषु *द्वयोः* सन्दर्भयोर्व्याख्या संस्कृतभाषया देवनागरलिप्या च कार्य्या। 5×2=10

**Group-A**

**(राजवाहनचरिते)**

(a) कः स महापुरुषो येनैतन्मानुषमात्रदुष्करं महत्कर्मानुष्ठितम्।

(b) स्मर तस्या हंसगामिनि हंसकथायाः। सहस्व वासु मासद्वयम्।

(c) प्रातरेव राजभवनद्वारे स दुरात्मा कन्यान्तःपुरदूषकः सन्निधापयितव्यः।

**Group-B**

**(कादम्बर्याः कथामुखे)**

**3.** कस्यचन *एकस्य* व्याख्या देवभाषया देवनागरलिप्या च क्रियताम्। 5×1=5

(a) नाम्नैव यो निर्भिन्नारातिहृदयो विरचितनरसिंहरूपाडम्बरमेकविक्रमाक्रान्तसकलभुवनतलो विक्रमत्रयायासितं जहासेव वासुदेवम्।

(b) वैनतेय इव विनतानन्दजननः, वैन्य इव चापकोटिसमुत्सारितसकलारातिकुलाचलो राजा शूद्रको नाम।

**Group-C**

**(कादम्बर्याः शुकनासोपदेशे)**

**4.** सुरगिरा देवनागर्या च यथेच्छ*मेक*तरस्य संस्कृतेन देवनागरलिप्या च व्याख्या कार्य्या। 5×1=5

(a) अहंकारदाहज्वरमूर्च्छान्धकारिता विह्वला हि राजप्रकृतिः। अलीकाभिमानोन्मादकारीणि धनानि। राज्यविषविकारतन्द्रीप्रदा राजलक्ष्मीः।

(b) मिथ्यामाहात्म्यगर्वनिर्भराश्च न प्रणमन्ति देवताभ्यः, न पूजयन्ति द्विजातीन्, न मानयन्ति मान्यान्, नार्चयन्त्यर्चनीयान्, नाभिवादयन्त्यभिवादनार्हान् नाभ्युत्तिष्ठन्ति गुरून्।

**5.** अधोलिखितेषु प्रश्नेषु कस्यचिदेकस्योत्तरं देयम्। 10×1=10

(a) 'अहमस्मि सोमरश्मिसम्भवा...... सुरसुन्दरी।' – कासीत्सुरसुन्दरी? तस्याः शापवृत्तान्तः सम्यग्रूपेणालोच्यताम्।

(b) 'कादम्बरीरसभरेण समस्त एव मत्तो न कश्चिदपि चेतयते जनोऽयम्' – एतस्य सार्थक्यं सयुक्ति प्रतिपाद्यताम्।

(c) कादम्बर्याः शुकनासोपदेश इति गद्यानुसारं लक्ष्मीचरितं वर्ण्यताम्।

———————

## B.A. 1st Semester (Honours) Examination, 2019-20

## SANSKRIT

**Course ID : 10914** **Course Code : AHSNS-103GE-1**

Course Title: Drama & Grammar

**Time: 2 Hours** **Full Marks: 40**

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

**Group-A**

**1.** यथेच्छ*मेकस्य* सप्रसङ्गव्याख्या संस्कृतेन देवनागरलिप्या च लेख्या। 5×1=5

যে কোনো *একটি*র প্রসঙ্গসহিত সংস্কৃত ভাষায় ও দেবনাগরী লিপিতে ব্যাখ্যা লেখো।

(a) इदं किलाव्याजमनोहरं वपुस्तप:क्षमं साधयितुं य इच्छति।
ध्रुवं स नीलोत्पलपत्रधारया शमीलतां छेत्तुमृषिर्व्यवस्यति।।

(b) चित्रे निवेश्य परिकल्पितसत्त्वयोगा
रूपोच्चयेन मनसा विधिना कृता नु।
स्त्रीरत्नसृष्टिरपरा प्रतिभाति सा मे
धातुर्विभुत्वमनुचिन्त्य वपुश्च तस्या:।।

**2.** यथेच्छ*मेकस्य* संस्कृतेन देवनागरलिप्या च भावसम्प्रसारणं कार्यम्। 5×1=5

যে কোনো *একটি*র সংস্কৃতে ও দেবনাগরী লিপিতে ভাবসম্প্রসারণ করো।

(a) किमिव हि मधुराणां मण्डनं नाकृतीनाम्।

(b) सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्त:करणप्रवृत्तय:।

**3.** यथेच्छ*मेक:* प्रश्न: समाधेय:। 10×1=10

যে কোনো *একটি* প্রশ্নের উত্তর দাও।

(a) अभिज्ञानशकुन्तले विदूषकस्य नाम किम्? नाटकीयगतिविस्तारे विदूषकस्य भूमिका संक्षेपेण आलोच्यताम्।
অভিজ্ঞানশকুন্তলে বিদূষকের নাম কী? নাটকীয় গতিবিস্তারে বিদূষকের ভূমিকা সংক্ষেপে আলোচনা করো।

(b) शकुन्तलायै क: कथं शापं दत्तवान्? शापस्य नाटकीयतात्पर्यं निरूप्यताम्।
শকুন্তলাকে কে কেন শাপ দিয়েছিলেন? শাপটির নাটকীয় তাৎপর্য নিরূপণ করো।

(c) का हंसपदिका? अभिज्ञानशकुन्तले पञ्चमाङ्के वर्णितस्य हंसपदिकासङ्गीतस्य नाटकीयतात्पर्यम् आलोच्यताम्।
হংসপদিকা কে? অভিজ্ঞানশকুন্তলে পঞ্চমাঙ্কে বর্ণিত হংসপদিকা সঙ্গীতের নাটকীয় তাৎপর্য আলোচনা করো।

**4.** अधोनिर्दिष्टेषु द्वयोरुत्तरं प्रदेयम्। 2×2=4

নিম্নলিখিত যে কোনো দুটি প্রশ্নের উত্তর দাও।

(a) 'पुत्रमेवं गुणोपेतं चक्रवर्तिनमाप्नुहि'– कः कं प्रति इदमुक्तवान्? आशीर्वादस्यास्य को हेतुः?

'পুত্রমেবং গুণোপেতং চক্রবর্তিনমাপ্নুহি'— কে কার প্রতি এই উক্তি করেছেন? এই আশীর্বাদের হেতু কী?

(b) महर्षिः किमर्थं किं तीर्थ गतवान्?

মহর্ষি কোন তীর্থে কেন গিয়েছিলেন?

(c) 'असाधुदर्शी खलु तत्रभवान् काश्यपः'– केनोक्तम्? स कथमेवुक्तवान्?

'অসাধুদর্শী খলু তত্রভবান্ কাশ্যপঃ'— কে বলেছেন? তিনি কেন এইরূপ বলেছেন?

**Group-B**

**5.** अधस्स्थितेषु *त्रयाणां* रेखाङ्कितपदानां सकारणविभक्तिः निर्णेया। 2×3=6

নিম্নলিখিত বাক্যগুলির মধ্যে *তিনটি* বাক্যের রেখাঙ্কিত পদগুলির সকারণ কারক বিভক্তি নির্ণয় করো।

(a) ग्रामं गच्छन् अहिं लङ्घयति।

(b) जटाभिः तापसमपश्यम्।

(c) पुष्पेभ्यः स्पृहयति बाला।

(d) रुदति पुत्रे माता गृहं त्यजति स्म।

(e) शिशुः चक्षुषा काणः।

**6.** (i) अधोनिर्दिष्टेषु *द्वयोः* सविग्रह-समास-नाम लेख्यम्। 2×2=4

যে কোনো *দুটির* সবিগ্রহ সমাসের নাম লেখো।

(a) यथाशक्ति

(b) करचरणम्

(c) पद्मनाभः

(ii) अधस्स्थयोः *एकस्य* सन्धिः कार्यः। 1×1=1

*একটির* সন্ধি করো।

(a) पुनः + रमते

(b) रवौ + उदिते

**7.** यथेच्छं *पञ्चकस्य* परिनिष्ठितरूपं लेख्यम्। 1×5=5

*পাঁচটির* পরিনিষ্ঠিত রূপ লেখো।

(a) अद् + तुमुन्

(b) गै + शतृ

(c) हा + किन्

(d) आ – दा + ल्यप्

(e) स्थिर + ईयसुन्

(f) अधि – इ + शानच्

(g) शी + क्त

(h) गङ्गा + ढक्

———————

*AP-I/SNS-101C-IA/19*

# B.A. 1st Semester (Programme) Examination, 2019-20

## SANSKRIT

**Course ID : 10918** **Course Code : AP/SNS-101C-IA**

Course Title: Sanskrit Drama and Language

**Time: 2 Hours** **Full Marks: 40**

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

**Group-A**

**1.** यथेच्छम् *एकस्य* सप्रसङ्गव्याख्या संस्कृतेन देवनागरलिप्या च लेख्या। 5×1=5
প্রসঙ্গ উল্লেখপূর্বক সরল সংস্কৃতে ও দেবনাগরী লিপিতে যে কোনো *একটির* ব্যাখ্যা করো।

(a) इदं किलाव्याजमनोहरं वपु-
स्तप:क्षमं साधयितुं य इच्छति।
ध्रुवं स नीलोत्पलपत्रधारया
शमीलतां छेत्तुमृषिर्व्यवस्यति।।

(b) अर्थो हि कन्या परकीय एव
तामद्य संप्रेष्य परिग्रहीतु:।
जातो ममायं विशद: प्रकामं
प्रत्यर्पितन्यास इवान्तरात्मा।।

**2.** यथेच्छम् *एकस्य* संस्कृते देवनागरलिप्या च भावसम्प्रसारणं कार्यम्। 5×1=5
প্রসঙ্গ উল্লেখপূর্বক সরল সংস্কৃতে ও দেবনাগরী লিপিতে যে কোনো *একটির* ভাবসম্প্রসারণ করো।

(a) बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेत:।

(b) स्वभाव एवैष परोपकारिणाम्।

**3.** यथेच्छम् *एक:* प्रश्न: समाधेय:। 10×1=10
যে কোনো *একটি* প্রশ্নের উত্তর দাও ঃ

(a) अभिज्ञानशकुन्तले दुष्यन्तचरितम् आलोच्यताम्।
অভিজ্ঞানশকুন্তলে দুষ্যন্তচরিত্র আলোচনা করো।

(b) कालिदासवर्णित-तपोवनद्वयस्य तुलनात्मकमालोचनं कर्तव्यम्।
কালিদাসবর্ণিত দুটি তপোবনের তুলনাত্মক আলোচনা করো।

(c) अभिज्ञानशकुन्तले धीवरवृत्तान्तः आलोच्यताम्।

অভিজ্ঞান-শকুন্তলে ধীবরবৃত্তান্ত আলোচনা করো।

**4.** अधोनिर्दिष्टेषु *द्वयोः* प्रश्नयोः उत्तरं लेख्यम्। 2×2=4

নিম্নলিখিত প্রশ্নগুলির মধ্যে *দুটির* উত্তর লেখো।

(a) अनुसूया का? अनसूया इति पदस्य कः अर्थः?

অনসূয়া কে? অনসূয়া পদের অর্থ কী?

(b) 'मृगानुसारिणं साक्षात् पश्यामीव पिनाकिनम्' — कस्य उक्तिरियम्? कस्मिन् प्रसङ्गे इयमुक्तिः?

'মৃগানুসারিনং সাক্ষাৎ পশ্যামীব পিনাকিনম্' — কার এই উক্তি? কোন প্রসঙ্গে এই উক্তি?

(c) करभकः कः? कस्मिन् अङ्के तस्य उपस्थितिर्दृश्यते?

করভক কে? কোন অঙ্কে তার উপস্থিতি দেখা যায়?

## Group-B

**5.** अधस्स्थितेषु *त्रयाणां* रेखाङ्कितपदानां कारकविभक्तिः निर्णेया। 2×3=6

নিম্নলিখিত বাক্যগুলির মধ্যে যে কোনো *তিনটি* রেখাঙ্কিত পদের কারক বিভক্তি নির্ণয় করো।

(a) क्रोशं कुटिला नदी।

(b) भक्तिः कृष्णाय रोचते।

(c) स वेगेन धावति।

(d) पापात् पराजयते।

(e) कविषु कालिदासः श्रेष्ठः।

**6.** (a) अधोनिर्दिष्टेषु *द्वयोः* सविग्रहसमासनाम लेख्यम्। 2×2=4

যে কোনো *দুটির* বিগ্রহবাক্যসহ সমাসের নাম লেখো।

(i) यथाशक्ति

(ii) प्रत्यक्षम्

(iii) राजहंसः

(b) अधोस्स्थयोः *एकस्य* सन्धिः कार्यः। 1×1=1

যে কোনো *একটির* সন্ধি করো।

(i) पितः + रक्ष

(ii) गो + अक्षः

**7.** यथेच्छं *पञ्चकस्य* परिनिष्ठितरूपं लेख्यम्। 1×5=5

যে কোনো *পাঁচটির* পরিনিষ্ঠিত রূপ লেখো।

(a) पच् + क्त

(b) अस् + शतृ

(c) भृगु + अण्

(d) गर्ग + इञ्

(e) प्र–नम् + ल्यप्

(f) जि + तुमुन्

(g) धन् + मतुप्

(h) गम् + क्त्वा

# B.A. 1st Semester (Programme) Examination, 2019-20

## SANSKRIT

**Course ID : 10919** **Course Code : ACPSNS-103C-MIL-1**

Course Title: MIL-1

**Time: 2 Hours** **Full Marks: 40**

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

**1.** अधोलिखितेषु परिच्छेदेषु यथेच्छ*मेकं* पठित्वा प्रश्नानाम् उत्तराणि लिख्यन्ताम्। 10×1=10

(a) कस्मिंश्चिद् ग्रामे हरिदत्तनामा दरिद्र: ब्राह्मण: निवसति स्म। तेन भिक्षावृत्त्या जीविका उपार्ज्यते स्म। यदा तया वृत्त्या परिवारस्य भरणपोषणं सम्यक् न समभवत् तेन तदा कृषिकार्यम् अक्रियत। कठिनं श्रमं कुर्वता अपि तेन कृषिकर्मणि साफल्यं न अलभ्यत। दुर्दैवात् तस्य पक्वं सस्यमपि विनष्टम्। एकदा चिन्तित: स: स्वक्षेत्रे कस्यचिद् वृक्षस्य अध: शयान: आसीत्। तदा तेन कश्चन विषधर: सर्प: दृष्ट:! आदौ स सर्पाद् भीत: अभवत्। अनन्तरं तेन चिन्तितं यत् – 'अनेन सर्पेण मदीयं कृषिक्षेत्रं रक्ष्यते। इदानीं यावत् मया एतस्य सत्कारो न विहित:। मन्ये एतदर्थं सस्यं विनष्टं भवति। इत: परं मया एतस्य पूजा विधातव्या' इति।

(i) ब्राह्मणस्य नाम किम् आसीत् 1

(ii) कथं स ब्राह्मण: कृषिकर्म आरब्धवान्? 3

(iii) चिन्तित: स कुत्र शयान: आसीत्? 2

(iv) शस्यहानिकारणं किमासीत् ब्राह्मणस्य नये? 2

(v) कस्माद् भीत: अभवत् ब्राह्मण:? 1

(vi) शस्यहानिनिवारणाय कीदृश: उपाय: चिन्तित: ब्राह्मणेन? 1

(b) प्राचीने भारते मगधजनपदे नन्दवंशस्य साम्राज्यम् आसीत्। तस्मिन् राज्ये बुद्धिमन्त: मन्त्रिण: कर्तव्यनिष्ठा: कर्मचारिण: च राज्ञ: साहाय्यं कुर्वन्ति स्म। मगधसाम्राज्यस्य सभायां गुणवन्त: चिन्तनशीला: ज्ञानिनश्च पण्डिता: आसन्। ते विद्वांस: समदर्शिन: आसन्। अत: न्यायव्यवस्था अतीव समीचीना आसीत्। तस्मिन् राज्ये शक्तिमन्त: सैनिका: दीर्घकाया: वीराश्च आसन्। तै: तत्र अश्वशालायां श्वेतेभ्य: कृष्णेभ्य: रक्तेभ्य: विचित्रवर्णेभ्य: च बलिष्ठेभ्य: अश्वेभ्य: युद्धप्रशिक्षणं दीयते स्म। नगरस्य वैभवमपि उत्कृष्टमासीत्। तत्र उन्नतं दीर्घञ्च भवनं, सुन्दरं सुरम्यं मनोहरं च उद्यानं, विशाल: तड़ाग:, सुदीर्घ: राजमार्ग: च नगरस्य शोभां वर्धयन्ति स्म।

(i) नन्दवंशस्य साम्राज्यं कुत्र आसीत्? 1

(ii) राज्ञ: मन्त्रिण: कीदृशा: आसन्? 2

(iii) नगरस्य शोभा आलोच्यताम्। 3

(iv) सैनिका: कीदृशा: आसन्? 3

(v) सैनिका: केभ्य: युद्धप्रशिक्षणं यच्छन्ति स्म? 1

(c) भारतस्य चतुर्षु स्थानेषु कुम्भमेला: आयोज्यन्ते– प्रयागे, हरिद्वारे, उज्जयिन्यां, नासिके च। एतानि चत्वारि नगराणि चतसृणां प्रमुखानां नदीनां तीरेषु अवस्थितानि सन्ति। एषु प्रथम: तीर्थराज: प्रयाग: तिसृणां पवित्रनदीनां सङ्गमस्थले अवस्थित:। तासु तिसृषु नदीषु द्वे नद्यौ गङ्गायमुने च प्रयागे एव परस्परं मिलत:। तृतीया नदी सरस्वती विलुप्ता अस्ति। सा उपरि न दृश्यते। द्वितीयं हरिद्वारं गङ्गानदीतटे राजते। तृतीया नगरी उज्जयिनी सिप्रानद्या: तीरे वर्तते, तथा चतुर्थं नासिकनगरं गोदावरीनदीकूले अस्ति।

(i) कुम्भमेला कुत्र कुत्र आयोज्यते? 3

(ii) तीर्थराज: प्रयाग: कुत्र अवस्थित:? 2

(iii) का नदी अधुना विलुप्ता? 1

(iv) गङ्गायमुने परस्परं कुत्र मिलत:? 1

(v) गोदावरीकूले किं नगरम् अस्ति? 1

(vi) हरिद्वारं कुत्रावस्थितम्? 1

(vii) उज्जयिनी नगरी कुत्रास्ति? 1

**2.** यथेच्छ*मेकस्य* शब्दस्य सर्वाणि रूपाणि लेख्यानि। 5×1=5

(a) नदी - शब्दस्य

(b) हरि - शब्दस्य

**3.** यथेच्छं *द्वयो:* समाधानं कार्यम्। 5×2=10

(a) पठ्-धातो: विधिलिङि लङि च रूपणि लिखतु।

(b) लभ्-धातो: लटि लृटि च रूपाणि लिख्यन्ताम्।

(c) खाद्धातो: लोटि लङि च रूपाणि लिख्यन्ताम्।

**4.** यथेच्छं *पञ्चानां* रेखाङ्कितपदानां सकारणविभक्तिनिर्देश: करणीय:। 2×5=10

(a) रामेण सह सीता वनं गच्छति।

(b) वने गाव: चरन्ति।

(c) चर्मणि व्याघ्रं हन्ति।

(d) श्याम: घनादपि कृष्ण:।

(e) शिशु: हस्ताभ्याम् ओदनं खादति।

(f) सरस्वत्यै नम:।

(g) दरिद्रेभ्य: राजा वस्त्रं यच्छति।

(h) देवदत्त: यज्ञदत्तेन भारं वाहयति।

**5.** यथेच्छं प्रश्न*पञ्चकं* समाधेयम्। 1×5=5

(a) लभ्-धातोः शनच्प्रत्यये किं रूपम्।

(b) प्रपूर्वकात् नम्धातोः (क्त्वास्थाने) ल्यपि किं रूपम्?

(c) दातुम् इत्यस्य प्रकृतिप्रत्ययौ आलोच्यौ।

(d) पठनम् इत्यस्य व्युत्पत्तिनिर्णेया।

(e) स्तुत्यः इत्यत्र को नाम धातुः कश्च प्रत्ययः?

(f) देयम् इत्यस्य व्युत्पत्तिनिर्णयः कार्यः।

(g) गम्-धातोः क्त्वाप्रत्यये किं रूपम्।

*अथवा*

यथेच्छं *पञ्च* प्रश्नाः समाधेयाः। 1×5=5

(a) ईक्ष्-धातोः शानचि किं रूपम?

(b) कृधातोः अनीयर्-प्रत्यये पुंलिङ्गप्रथमैकवचने किं रूपम्?

(c) पठितुम् इत्यस्य व्युत्पत्तिः निर्णेया।

(d) पठ्धातोः शतृप्रत्यये पुंलिङ्गे प्रथमैकवचने किं रूपम्?

(e) कार्यम् इत्यस्य व्युत्पत्तिः निर्णेया।

(f) वच्-धातोः क्त्वाप्रत्यये किं रूपम?

(g) शीधातोः तुमुन्प्रत्यये किं रूपम्?

(g) पाधातोः यत्प्रत्यये क्लीवलिङ्गे प्रथमैकवचने किं रूपम्?

*AH-I/SNS-101C-1/19*

# B.A. 1st Semester (Honours) Examination, 2019-20

## SANSKRIT

**Course ID : 10911** **Course Code : AHSNS-101C-1**

Course Title: Classical Sanskrit Literature (Poetry) and Chanda

**Time: 2 Hours** **Full Marks: 40**

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

**1.** अधोनिर्देशानुसारं सर्वे प्रश्नाः समाधेयाः तेषु अवश्यमेव यथेच्छं प्रश्नद्वयस्य उत्तरं संस्कृतभाषायां देवनागरलिप्या च प्रदेयम्। 5×2=10

**Group-A**

**(किरातार्जुनीये)**

प्रश्नद्वयं समाधेयम्। 2×2=4

(a) 'न विव्यथे तस्य मनोः' — अत्र को वक्ता कश्च भावार्थः?

(b) 'क्रियापवर्गेष्वनुजीविसात्कृताः' — इत्यस्य सन्धिविच्छेदः विधेयः।

(c) 'पराभवोऽप्युत्सव एव मानिनाम्' — वाक्यस्यास्य किं तात्पर्यम्?

**Group-B**

**(कुमारसम्भवे)**

प्रश्नद्वयं समाधेयम्। 2×2=4

(a) 'कुमारसम्भवम्' इति महाकाव्यस्य प्रसिद्धः टीकाकारः कः कश्च टीकाग्रन्थः?

(b) 'वदन्त्यपर्णेति च तां पुराविदः' - का किमर्थम् अपर्णा इति अभिहिता?

(c) 'शरीरमाद्यं खलु धर्मसाधनम्' - वाक्यस्यास्य कः भावार्थः?

**Group-C**

**(छन्दोमंजर्याम्)**

*एकः* प्रश्नः समाधेयः। 2×1=2

(a) 'द्रुतविलम्बितम्' इति छन्दसः लक्षणं लिख्यताम्।

(b) यतेः लक्षणं प्रदेयम्।

**2.** अधोनिर्देशानुसारं सर्वे प्रश्नाः समाधेयाः। तेषां समेषाम् एव उत्तरं संस्कृतभाषायां देवनागरलिप्या च लेख्यम्।

**Group-A**

**(किरातार्जुनीये)**

*एकस्य* श्लोकस्य व्याख्या कार्या। 5×1=5

(a) तथाऽपि जिह्मः स भवज्जिगीषया तनोति शुभ्रं गुणसम्पदा यशः।

समुन्नयन् भूतिमनार्यसङ्गमाद् वरं विरोधोऽपि समं महात्मभिः।।

(b) व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः।

प्रविश्य हि घ्नन्ति शठास्तथाविधानसंवृताङ्गान्निशिता इवेषवः।।

**Group-B**

*एकस्य* श्लोकस्य व्याख्या करणीया। 5×1=5

(a) मनीषिताः सन्ति गृहेषु देवतास्तपः क्व वत्से

क्व च तावकं वपुः।

पदं सहेत भ्रमरस्य पेलवं

शिरोषपुष्पं न पुनः पतत्रिणः।।

(b) यदुच्यते पार्वति पापवृत्तये न रूपमित्यव्यभिचारि तद्वचः।

तथाहि ते शीलमुदारदर्शने तपस्विनामप्युपदेशतां गतम्।।

**Group-C**

**(छन्दोमञ्जर्याम्)**

(a) *एक*माश्रित्य टीका लेख्या। 5×1=5

(i) वंशस्थविलम्

(ii) शिखरिणी

(b) अधोनिर्दिष्टेषु चरण*द्वयस्य* छन्दोनिरूपणं कार्यम्। 2½×2=5

(i) एवमाश्रमविरुद्धवृत्तिना।

(ii) न विवृतो मदनो न च संवृतः।

(iii) आकाशमाविष्कृतचारुतारम्।

(iv) तीव्राघातप्रतिहततरुः स्कन्धलग्नैकदन्तः।

**3.** अधोलिखितेषु *एकस्य* प्रश्नस्य उत्तरं लेख्यम्। 10×1=10

(a) 'किरातार्जुनीयम्' इति महाकाव्यमनुसृत्य दुर्योधनस्य राज्यशासनपद्धतिः आलोचनीया।

(b) कुमारसम्भवस्य पञ्चमसर्गानुसारं पार्वत्याः तपस्यास्वरूपं विशदं प्रतिपाद्यताम्।

(c) भारवेरर्थगौरवम् - सोदाहरणं व्याख्येयम्।